श्री सुब्रह्मण्य पंचरत्नं

श्री सुब्रह्मण्य पंचरत्नं

षडाननं चंदनलेपितांगं
महोरसं दिव्यमयूरवाहनं |
रुद्रस्यसूनुं सुरलोकनाथं
ब्रह्मण्यदेवं शरणं प्रपद्ये || 1 ||

जाज्वल्यमानं सुरबृंदवंद्यं
कुमारधारातट मंदिरस्थं |
कंदर्परूपं कमनीयगात्रं
ब्रह्मण्यदेवं शरणं प्रपद्ये || 2 ||

द्विषड्भुजं द्वादशदिव्यनेत्रं
त्रयीतनुं शूलमसी दधानं |
शेषावतारं कमनीयरूपं
ब्रह्मण्यदेवं शरणं प्रपद्ये || 3 ||

सुरारिघोराहवशोभमानं
सुरोत्तमं शक्तिधरं कुमारं |
सुधार शक्त्यायुध शोभिहस्तं
ब्रह्मण्यदेवं शरणं प्रपद्ये || 4 ||

इष्टार्थसिद्धिप्रदमीशपुत्रं
इष्टान्नदं भूसुरकामधेनुं |
गंगोद्भवं सर्वजनानुकूलं
ब्रह्मण्यदेवं शरणं प्रपद्ये || 5 ||

यः श्लोकपंचकमिदं पठतीह भक्त्या
ब्रह्मण्यदेव विनिवेशित मानसः सन् |
प्राप्नोति भोगमखिलं भुवि यद्यदिष्टं
अंते स गच्छति मुदा गुहसाम्यमेव || 6 ||

इति श्री सुब्रह्मण्य पंचरत्नं |